# ब्रह्मसूत्र – अध्यास भाष्य

युष्मद्–अस्मद् प्रत्ययगोचरयोः विषय–विषयिणोः तमः प्रकाशवद् विरुद्धस्वभावयोः इतरेतर भाव अनुपपत्तौ सिद्धायां तद्धर्माणां अपि सुतरां इतरेतर भाव अनुपपत्तिः इत्यतः अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत् प्रत्ययगोचरस्य विषयस्य तद्धर्माणां च अध्यासः, तद् विपर्ययेण विषयिणः तद्धर्माणां च विषये अध्यासो मिथ्या इति भवितुं युक्तम्।

तथापि अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्यधर्माश्च अध्यस्य इतरेतर अविवेकेन, अत्यन्तविविक्तयोः धर्म –धर्मिणोः मिथ्याज्ञान निमित्तः सत्यानृते मिथुनीकृत्य, अहमिदं ममेदं इति नैसर्गिकः अयं लोकव्यवहारः।

आह – कोऽयम् अध्यासो नाम इति। उच्यते – स्मृतिरूपः परत्र पूर्वदृष्टावभासः। तं केचिद् अन्यत्र अन्य धर्म अध्यासः इति वदन्ति।

केचित्तु यत्र यद् अध्यासः तद्विवेकाग्रहनिबन्धनो भ्रमः इति।

# ब्रह्मसूत्र – अध्यास भाष्य

अन्ये तु यत्र यद् अध्यासः तस्यैव विपरीतधर्मत्व कल्पनाम् आचक्षते इति। सर्वथापि तु अन्यस्य अन्य –धर्म–अवभासतां न व्यभिचरति। तथा च लोकेऽनुभवः – शुक्तिका हि रजतवद् अवभासते, एकः चन्द्रः सद्वितीयवद् इति।

कथं पुनः प्रत्यगात्मनि अविषयेऽध्यासः विषय तत् धर्माणाम्? सर्वो हि पुरोऽवस्थिते विषये विषयान्तरम् अध्यस्यति। युष्मत्प्रत्यय अपेतस्य च प्रत्यगात्मनः अविषयत्वं ब्रवीषि।

उच्यते – न तावदयम् एकान्तेन अविषयः अस्मत्प्रत्ययविषयत्वात्। अपरोक्षत्वाच्च प्रत्यगात्म प्रसिद्धः। न च अयम् अस्ति नियमः – पुरोऽवस्थित एव विषये विषयान्तरम् अध्यसितव्यम् इति। अप्रत्यक्षेऽपि हि आकाशे बालाः तल–मलिनतादि अध्यस्यन्ति। एवम् अविरुद्धः प्रत्यगात्मनि अपि अनात्म अध्यासः। तं एतमेवं – लक्षणं अध्यासं पण्डिता अविद्या इति

# ब्रह्मसूत्र – अध्यास भाष्य

मन्यन्ते। तद्विवेकेन च वस्तुस्वरूप अवधारणं विद्याम् आहुः। तत्रैवं सति यत्र यद् अध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रणे अपि स न सम्बध्यते। तं एतम् अविद्याख्यं आत्म–अनात्मनोः इतरेतर अध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि।

कथं पुनः अविद्यावद् विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति? उच्यते – देहेन्द्रियादिषु अहं–मम अभिमानरहितस्य प्रमातृत्व अनुपपत्तौ प्रमाणप्रवृत्ति अनुपपत्तः। न हि इन्द्रियाणि अनुपादाय प्रत्यक्षादि व्यवहारः सम्भवति। न च अधिष्ठानमन्तरेण इन्द्रियाणां व्यवहारः सम्भवति। न च अनध्यस्त आत्मभावेन देहेन कश्चिद् व्याप्रियते। न च एतस्मिन् सर्वस्मिन् असति असंगस्य आत्मनः प्रमातृत्वम् उपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाण–प्रवृत्तिः अस्ति। तस्माद् अविद्यावद् विषयाणि एव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च।

# ब्रह्मसूत्र – अध्यास भाष्य

पश्वादिभिश्च अविशेषात्। यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते, अनुकूले च प्रवर्तन्ते, यथा दण्ड–उद्योतकरं पुरुषम् अभिमुखम् उपलभ्य मां हन्तुं अयम् इच्छति इति पलायितुं आरभन्ते, हरित–तृणपूर्णपाणिम् उपलभ्य तं प्रत्यभिमुखीभवन्ति इति, एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीना आक्रोशतः खड्गोद्यतकरान् बलवतः उपलभ्य ततो निवर्तन्ते तद् विपरीतान् प्रति प्रवर्तन्ते, अतः समानः पश्वादिभिः पुरुषाणां प्रमाण–प्रमेयव्यवहारः। पश्वादीनां च प्रसिद्धः अविवेकपुरःसरः प्रत्यक्षादिव्यवहारः तत्सामान्यदर्शनाद् व्युत्पत्तिमतां अपि पुरुषाणां प्रत्यक्षादिव्यवहारः तत्कालः समान इति निश्चीयते।

शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी न अविदित्वात्मनः परलोकसम्बन्धम् अधिक्रियते तथापि न वेदान्तवेद्यम् अशनायादि अतीतम् अपेत ब्रह्मक्षत्रादि भेदम्

# ब्रह्मसूत्र – अध्यास भाष्य

असंसारी आत्मतत्त्वम् अधिकारे अपेक्ष्यते, अनुपयोगाद् अधिकार विरोधाच्च। प्राक् तथाभूत आत्मविज्ञानात् प्रवर्तमानं शास्त्रम् अविद्यावद्विषयत्वं नातिवर्तते। तथा हि - 'ब्राह्मणो यजेत' इत्यादीनि शास्त्राणि आत्मनि वर्णाश्रमवयोऽवस्थादि विशेष अध्यासम् आश्रित्य प्रवर्तन्ते। अध्यासो नाम अतस्मिंस्तद्बुद्धिः इति अवोचाम। तद्यथा – पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वा इति बाह्य–धर्मान् आत्मनि अध्यस्यति, तथा – देहधर्मान् स्थूलोऽहं, कृशोऽहं, गौरोऽहं, तिष्ठामि, लंघ्यामि च इति।

तथा इन्द्रियधर्मान् - मूकः, काणः, क्लीबः, बधिरः, अन्धः अहमिति। तथा अन्तःकरणधर्मान् कामसंकल्प –विचिकित्सा अध्यवसायादीन्, एवं अहंप्रत्ययिनम् अशेष–स्वप्रचारसाक्षिणि प्रत्यगात्मनि अध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिषु अध्यस्यति। एवं अयं अनादिः अनन्तः नैसर्गिकः

# ब्रह्मसूत्र - अध्यास भाष्य

अध्यासः मिथ्याप्रत्ययरूपः कर्तृत्व-भोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः। अस्यानर्थहेतोः ग्रहाणाय आत्मैकत्व-विद्याप्रतिपत्तये सर्वे वेदान्ताः आरभ्यन्ते। यथा च अयमर्थः सर्वेषां वेदान्तानां, तथा वयम् अस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः।

**इति अध्यासभाष्यं समाप्तम्**

Vedanta Ashram, Indore

Web Site : https://www.vmission.org.in